द्वितीयः पाठः



# २ मातामह्याः उपनेत्रम्


वस्तुओं को उनके निर्धारित स्थान पर रखना उचित है। कभी-कभी असावधानी के कारण जब आवश्यक वस्तु दिखाई नहीं देती, तब हम धैर्यपूर्वक उसे खोजते हैं और परिवार का सहयोग लेते हैं। इस हास्यपूर्ण कहानी में रमा अपनी नानी का चश्मा खोजती है।

It is proper to keep things in their designated places. Sometimes, due to carelessness, a necessary item cannot be found. At such times, we search patiently and seek help from our family. In this humorous story, Rama searches for her maternal grandmother's spectacles.



एषा रमायाः मातामही अस्ति। रमायाः मातामही सर्वदा उपनेत्रं धारयति।

मातामह्याः पुस्तकानां पठने अभिरुचिः अस्ति। मातामही प्रतिदिनं प्रातः वार्तापत्रं पठति। एकस्मिन् दिने मातामही प्रातः एव रमाम् उत्थापयितुं प्रयासम् अकरोत्। मातामही उपनेत्रं न लभते स्म।
उपनेत्रं विना मातामही कष्टम् अनुभवति स्म। सा आवश्यकानि वस्तूनि अन्वेष्टुं समर्था न आसीत्।



रमा गाढनिद्रायाम् आसीत्। सा निद्रां न त्यजति स्म। मातामही रमाम् अति-स्नेहेन उत्थापितवती।

© NCERT not to be published



सा रमाम् उपनेत्रम् अन्वेष्टुम् उक्तवती। रमा निद्रायाम् एव उपनेत्रम् अन्वेष्टुम् आरभत। सा उपधानानाम् अधः उपनेत्रम् अन्विष्टवती। मातामही बहुवारं तत्र उपनेत्रं स्थापयति स्म।

उपनेत्रम् उपधानानाम् अधः न लब्धम्।

मातामही रमां समयं पृच्छति स्म। रमा अवदत्– लघुसूचिका पञ्चमे अङ्के दीर्घसूचिका षष्ठे अङ्के च अस्ति।

प्रायशः सार्ध-पञ्चवादन-समयः आसीत्। मातामह्या वार्तापत्रं पठनीयम् आसीत्, भ्रमणाय च गन्तव्यम् आसीत्।



रमा मातामह्याः उत्पीठिकायां पुस्तकानां मध्ये उपनेत्रम् अन्विष्टवती। मातामही उत्पीठिकायां स्थित्वा वार्तापत्रं पुस्तकानि च पठति। प्रायेण सा पुस्तकानां मध्ये उपनेत्रं त्यजति।



उपनेत्रम् उत्पीठिकायां न आसीत्। रमा उपनेत्रं स्नानागारे अन्विष्टवती। स्नानागारे बहूनि वस्त्राणि आसन्। मातामही यदा कदा उपनेत्रं स्नानागारे त्यजति स्म।

उपनेत्रं स्नानागारे अपि न आसीत्।

© NCERT not to be republished

रमा उपनेत्रम् अङ्गणे अन्विष्टवती। अङ्गने बहूनि वस्तूनि आसन्। मातामही प्रायः अङ्गणे खट्वायाम् उपनेत्रं त्यजति स्म।

उपनेत्रं खट्वायाम् अपि न लब्धम्।





रमा मातामह्याः ऊर्ण-स्यूते उपनेत्रम् अन्विष्टवती। स्यूते ऊर्णायाः अनेकानि गोलकानि आसन्। तस्मिन् अर्ध-ऊतानि ऊर्ण-वस्त्राणि अपि आसन्।

उपनेत्रं स्यूते अपि न आसीत्।

रमा उपनेत्रं दर्पणस्य निकटे अन्विष्टवती। तत्र कङ्कतिकाः तैलकूप्यः च आसन्। मातामही प्रायः केशानां प्रसाधन-समये उपनेत्रम् अवतारयति स्म।

उपनेत्रं दर्पणं निकषा अपि न आसीत्।




© NCERT not to be republished

रमा उपनेत्रं कपाटिकायाम् अन्विष्टवती। कपाटिकायां मातामह्याः शाटिकाः आसन्।

मातामही बहुवारम् उपनेत्रं कपाटिकायां त्यजति स्म।



उपनेत्रं कपाटिकायाम् अपि न आसीत्।

उपनेत्रम् अन्वेष्टुं रमा पर्यङ्कस्य अधः प्रविष्टा। पर्यङ्कस्य अधः मुनमुनः उपविष्टः आसीत्। मुनमुनस्य पादयोः मध्ये किमपि आसीत्।




तत् सम्यक् न दृश्यते स्म।

रमा मुनमुनं बहिः अकरोत्। मुनमुनेन सह मातामह्याः उपनेत्रम् अपि आगतम्।

रमा सत्वरम् उपनेत्रं गृहीतवती।


सा उपनेत्रं गृहीत्वा मातामह्याः समीपम् अधावत्। मातामही उपनेत्रं दृष्ट्वा अति-प्रसन्ना जाता। सा उपनेत्रं धारितवती।



सा वार्तापत्रं पठितुम् उपविष्टवती। मातामही चिरं वार्तापत्रम् अपठत्। मातामही रमां भ्रमणाय आहूतवती।

© NCERT not to be republished

रमा उपनेत्रं मुनमुनम् अधारयत्। मुनमुनः उपनेत्रं धृत्वा अति-शोभनः दृश्यते स्म। तदनन्तरं ताः तिस्रः भ्रमणाय निर्गताः।



## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिंदी | English | मातृभाषया अर्थं लिखत |
|---|---|---|---|---|
| मातामही | मातुः माता | नानी | Maternal Grandmother | |
| उपनेत्रम् | स्पष्टतया दर्शनार्थम् एकम् उपकरणम् | चश्मा | Spectacles / Glasses | |
| धारयति | धारणं करोति | पहनती है | Wears | |
| अभिरुचिः | आसक्तिः | रुचि | Interest | |
| वार्तापत्रम् | समाचारपत्रम् | अखबार | Newspaper | |

© NCERT not to be republished

| | | | | |
|---|---|---|---|---|
| उत्थापयितुम् | जागरयितुम् | जगाने के लिए | To wake up | |
| अन्वेष्टुम् | अन्वेषणं कर्तुम् | खोजने के लिए | To search | |
| गाढनिद्रायाम् | प्रसुप्तौ | गहरी नींद में | In deep sleep | |
| उपधानानाम् | मस्तकोपधानानाम् | तकियों के | Of pillows | |
| बहुवारम् | अनेकवारम् | कई बार | Many times | |
| उत्पीठिकायाम् | काष्ठफलके | मेज पर | On the table | |
| स्नानगृहे | स्नानार्थं गृहं, तस्मिन् | स्नानघर में | In the bathroom | |
| अङ्गने | प्राङ्गणे | आँगन में | In the courtyard | |
| खट्वायाम् | शय्यायाम् | खाट पर | On the cot | |
| ऊर्ण-स्यूते | ऊर्णपुटे | ऊन के थैले में | In the woollen bag | |
| गोलकानि | ऊर्ण-कन्दुकानि | ऊन के गोले | Balls of yarn | |
| दर्पणस्य | आदर्शस्य | शीशे का | Of the mirror | |
| कपाटिकायाम् | कपाटे | अलमारी में | In the cupboard | |
| शाटिकाः | स्त्रीणां वस्त्र-विशेषः | साड़ियाँ | Sarees | |
| पर्यङ्कस्य | खट्वायाः | पलंग का | Of the bed | |

© NCERT not to be republished

## अत्र इदम् अवधेयम्

१. अव्ययपदानि— यस्य पदस्य नाना विभक्तिवचनेषु परिवर्तनं न भवति, तत् पदम् अव्ययं भवति। शास्त्रे उक्तम्—

"सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥"

**उदाहरणानि—**

(i) अधः / नीचे / Below

(ii) कदा / कब / When

(iii) एव / ही / Only

(iv) बहिः / बाहर / Outside

(v) प्रातः / सुबह / Morning

(vi) चिरं / लम्बे समय तक / For long

(vii) यावत् / पर्यन्त, जब तक / Till the time

२. 'स्म' इत्यस्य प्रयोगेण वर्तमानकालवाक्यानां भूतकालवाक्येषु परिवर्तनम् भवति।

| वर्तमानकालः | भूतकालः—'स्म' प्रयोगः |
|---|---|
| मातामही उपनेत्रं धारयति। | मातामही उपनेत्रं धारयति स्म। |
| सा वार्तापत्रं पठति। | सा वार्तापत्रं पठति स्म। |
| रमा उपनेत्रम् अन्विष्यति। | रमा उपनेत्रम् अन्विष्यति स्म। |
| मातामही उपनेत्रं त्यजति। | मातामही उपनेत्रं त्यजति स्म। |
| मुनमुनः पर्यङ्कस्य अधः उपविशति। | मुनमुनः पर्यङ्कस्य अधः उपविशति स्म। |

© NCERT not to be republished

## वयम् अभ्यासं कुर्मः

**१. अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखत—**

**यथा— प्रश्नः** मातामही प्रतिदिनं किं पठति?

**उत्तरम् वार्तापत्रम्**

क. कस्य अधः मुनमुनः उपविष्टाः आसीत्?

.................................................................................................................

ख. प्रायशः कः समयः आसीत्?

.................................................................................................................

ग. उपनेत्रं कस्य पादयोः मध्ये आसीत्?

.................................................................................................................

घ. मातामही प्रतिदिनं कदा वार्तापत्रं पठति?

.................................................................................................................

ङ. उपनेत्रं धृत्वा कः शोभनः दृश्यते स्म?

.................................................................................................................

**२. अधोलिखितानि वाक्यानि पठित्वा 'आम्' 'न' वा लिखत—**

क. उपनेत्रं विना मातामही कष्टम् अनुभवति स्म। आम्

ख. रमा कपाटिकायाम् उपनेत्रं अन्विष्टवती। ..................

ग. पर्यङ्कस्य अधः मुनमुनः उपविष्टः आसीत्। ..................

घ. मुनमुनस्य पादयोः मध्ये उपनेत्रम् आसीत्। ..................

ङ. रमा उपनेत्रं स्नानागारे अन्विष्टवती। ..................

च. मातामही प्रतिदिनं प्रातः वार्तापत्रं न पठति। ..................

© NCERT not to be republished

## ३. मञ्जूषातः उचितं शब्दं चित्वा विलोमशब्दान् लिखत—

**दुःखिता, दूरम्, बहिः, उपरि, सत्वरम्**

| शब्दः | विलोमशब्दः |
|---|---|
| अधः | उपरि |
| अन्तः | |
| समीपम् | |
| मन्दम् | |
| प्रसन्ना | |

## क्रियाकलापः

**१. भूमिकाभिनयः**

त्रयः छात्राः 'मातामही', 'रमा', 'मुनमुनः' इति एतेषां भूमिकाः स्वीकुर्वन्तु। कथायाः प्रमुखसंवादान् सरलसंस्कृतेन वदन्तु। अन्ते मुनमुनः उपनेत्रं धृत्वा हास्यदृश्यं प्रदर्शयतु।

**२. मम गृहस्य वस्तु-स्थान-सूचीं पूरयत —**

| वस्तु | नियतस्थानम् |
|---|---|
| पुस्तकम् | उत्पीठिकायाम् |
| वस्त्रम् | |
| स्यूतः | |
| पादत्राणम् | |
| घटिका | |

© NCERT not to be republished